# devIgItishatakam

# દેવીગીતિશતકમ્

## Document Information

Text title : devIgItishatakam

File name : devIgItishatakam.itx

Category : shataka, devii, devI

Location : doc_devii

Author : Sundaracharya

Proofread by : PSA Easwaran

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : March 23, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# દેવીગીતિશતકમ્

શ્રીગણેશાય નમઃ ॥

કિં દેવૈઃ કિં જીવૈઃ કિં ભાવૈસ્તેઽપિ યેન જીવન્તિ ।
તવ ચરણં શરણં મે દરહણં દેવિ કાન્તિમત્યમ્બ ॥ ૧॥

અરુણામ્બુદનિભકાન્તે કરુણારસપૂરપૂર્ણનેત્રાન્તે ।
શરણં ભવ શશિબિમ્બદ્યુતિમુખિ જગદમ્બ કાન્તિમત્યમ્બ ॥ ૨॥

કલિહરણં ભવતરણં શુભભરણં જ્ઞાનસમ્પદાં કરણમ્ ।
નતશરણં તવ ચરણં કરોતુ મે દેવિ કાન્તિમત્યમ્બ ॥ ૩॥

અમિતાં સમતાં મમ તાં તનુ તાં તનુતાં ગતાં પદાબ્જં તે ।
કૃપયા વિદિતો વિહિતો યયા તવાહં હિ કાન્તિમત્યમ્બ ॥ ૪॥

મમ ચરિતં વિદિતં ચેદુદયેન્ન દયા કદાપિ તે સત્યમ્ ।
તદપિ વદામ્યયિ કુરુ તાં નિર્હેતુકમાશુ કાન્તિમત્યમ્બ ॥ ૫॥

ન બુધત્વં ન વિધુત્વં ન વિધિત્વં નૌમિ કિં તુ ભૃઙ્ગત્વમ્ ।
અસકૃત્પ્રણમ્ય યાચે ત્વચ્ચરણાબ્જસ્ય કાન્તિમત્યમ્બ ॥ ૬॥

અભજમહં કિં સારે કંસારે વીપદેઽપિ સંસારે ।
રુચિમત્તાં શુચિમત્તામહહ ત્વં પાહિ કાન્તિમત્યમ્બ ॥ ૭॥

મામસકૃદપ્રસાદાદ્દુષ્કૃતકારીતિ માઽવમન્યસ્વ ।
સ્મર કિં ન મયા સુકૃતં વર્ધિતમિદમદ્ય કાન્તિમત્યમ્બ ॥ ૮॥

કરુણાવિષયં યદિ માં ન તનોષિ યથા તથાપિ વર્તેઽહમ્ ।
ભવતિ કૃપાલુત્વં તે સીદામિ મૃષેતિ કાન્તિમત્યમ્બ ॥ ૯॥

અતુલિતભવાનુરાગિણિ દુર્વર્ણાચલવિહારિણિ મયિ ત્વમ્ ।
સમતેર્ષ્યયા પ્રસાદં ન વિધત્સે કિં નુ કાન્તિમત્યમ્બ ॥ ૧૦॥

દ્યાં ગાં વાભ્યપતં યદિ જીવાતુસ્ત્વામૃતેઽન્તતઃ કો મે ।

હિત્વા પયોદપઙ્ક્તિં સ્તોકસ્ય ગતિઃ ક્વ કાન્તિમત્યમ્બ ॥ ૧૧॥

કં વા કટાક્ષલક્ષ્યં ન કરોષ્યેવં મયિ ત્વમાસીઃ કિમ્ ।
કિં ત્વામુપાલભેઽહં વિધિર્ગરીયાન્ હિ કાન્તિમત્યમ્બ ॥ ૧૨॥

તનુજે જનની જનયત્યહિતેઽપિ પ્રેમ હીતિ તન્મિથ્યા ।
યદુપેક્ષસે ત્રિલોકીં માતર્માં દેવિ કાન્તિમત્યમ્બ ॥ ૧૩॥

નિન્દામિ સાધુવર્ગં સ્તૌમિ પુનઃ ક્ષીણષડ્ગસંસર્ગમ્ ।
વન્દે કિં તે ચરણે કિં સ્યાત્પ્રીતિસ્તુ કાન્તિમત્યમ્બ ॥ ૧૪॥

ગીર્વાણવૃન્દજિહ્વારસાયનસ્વીયમાનનીયગુણે ।
નિગમાન્તપઞ્જરાન્તરમરાલિકે પાહિ કાન્તિમત્યમ્બ ॥ ૧૫॥

ત્રિનયનકાન્તે શાન્તે તાન્તે સ્વાન્તે મમાસ્તુ વદ દાન્તે ।
કૃપયા મુનિજનચિન્તિતચરણે નિવસાદ્ય કાન્તિમત્યમ્બ ॥ ૧૬॥

ધુતકદને કૃતમદને ભૃશમદને યોગિશર્વભક્તાનામ્ ।
મણિસદને શુભરદને શશિવદને પાહિ કાન્તિમત્યમ્બ ॥ ૧૭॥

ગિરિતનુજે હતદનુજે વરમનુજેડ્યાભિધે ચ હર્યનુજે ।
ગુહતનુજેઽવિતમનુજે કુરુ કરુણાં દેવિ કાન્તિમત્યમ્બ ॥ ૧૮॥

ગજગમને રિપુદમને હરકમને કૢપ્તપાપકૃચ્છમને ।
કલિજનને મયિ દયયા પ્રસીદ હે દેવિ કાન્તિમત્યમ્બ ॥ ૧૯॥

યન્માનસે પદાબ્જં તવ સંવિદ્ભાસ્વદાભયાઽઽભાતિ ।
તત્પાદદાસદાસકદાસત્વં નૌમિ કાન્તિમત્યમ્બ ॥ ૨૦॥

દુષ્કરદુષ્કૃતરાશેર્ન બિભેમિ શિવે યદિ પ્રસાદસ્તે ।
દલને દૃષદાં ટઙ્કઃ કલ્પેત ન કિં નુ કાન્તિમત્યમ્બ ॥ ૨૧॥

કોમલદેહં કિમપિ શ્યામલશોભં શરન્મૃગાઙ્કમુખમ્ ।
રૂપં તવ હૃદયે મમ દીપશ્રિયમેતુ કાન્તિમત્યમ્બ ॥ ૨૨॥

કિઞ્ચનવઞ્ચનદક્ષં પઞ્ચશરારેઃ પ્રપઞ્ચજીવાતુમ્ ।
ચઞ્ચલમઞ્ચલમક્ષ્ણોરયિ મયિ કુરુ દેવિ કાન્તિમત્યમ્બ ॥ ૨૩॥

અઞ્ચતિ યં ત્વદપાઙ્ગઃ કિઞ્ચિત્તસ્યૈવ કુમ્ભદાસત્વે ।
અહમહમિકયા વિબુધાઃ કલહં કલયન્તિ કાન્તિમત્યમ્બ ॥ ૨૪॥

કિમિદં વદાદ્ભુતં તે કસ્મિંશ્ચિલ્લક્ષિતે કટાક્ષેણ ।
બૃંહાદીનાં હૃદયં દીનત્વં યાતિ કાન્તિમત્યમ્બ ॥ ૨૫॥

પ્રાયો રાયોપચિતે માયોપાયોલ્બણાસુરક્ષપણે ।
ગેયો  જાયોરુબલે શ્રેયો ભૂયોઽસ્તુ કાન્તિમત્યમ્બ ॥ ૨૬॥

કરણં શરણં તવ લસદલકં કુલકં ગિરીશભાગ્યાનામ્ ।
સરલં વિરલં જયતિ સકરુણં તરુણાં હિ કાન્તિમત્યમ્બ ॥ ૨૭॥

શઙ્કુરિ નમાંસિ વાણી કિઙ્કુરિ દૈતેયરાડ્ભયઙ્કુરિ તે ।
કરવૈ મુરવૈર્યનુજે પુરવૈર્યભિકેઽદ્ય કાન્તિમત્યમ્બ ॥ ૨૮॥

તવ સેવાં ભુવિ કે વા નાકાઙ્ક્ષન્તે ક્ષમાભૃતસ્તનયે ।
ત્વમિવ ભવેયુર્યદિ તે ભજન્તિ યે યાં હિ કાન્તિમત્યમ્બ ॥ ૨૯॥

ભવદવશિખાભિવીતં શીતલયેર્માં કટાક્ષવિક્ષેપૈઃ ।
કાદમ્બિનીવ સલિલૈઃ શિખણ્ડિનં દેવિ કાન્તિમત્યમ્બ ॥ ૩૦॥

ત્વદ્ગુણપયઃકણં મે નિપીય મુક્તેરલઙ્ક્રિયાં ગિરતુ ।
ચેતઃશુક્તિર્મુક્તાં ભક્તિમિષાં દેવિ કાન્તિમત્યમ્બ ॥ ૩૧॥
ગુણગણમહામણીનામાગમપાથોધિજન્મભાજાં તે ।
ગુણતાં કદા નુ ભજતાં મમ ધિષણા દેવિ કાન્તિમત્યમ્બ ॥ ૩૨॥

પાટીરચર્ચિતસ્તનિ કોટીરકૃતક્ષપાધિરાટ્કલિકે ।
વીટીરસેન કવિતાધાટીં કુરુ મેઽદ્ય કાન્તિમત્યમ્બ ॥ ૩૩॥

તવ કરુણાં કિં બ્રૂમસ્ત્વામપ્યેષાનવેક્ષ્ય તૂષ્ણીકામ્ ।
ઊરીકરોતિ પાપિનમપિ વિનતં દેવિ કાન્તિમત્યમ્બ ॥ ૩૪॥

ઈશોઽપિ વિના ભવતીં ન ચલિતુમપિ કિં પુનર્વયં શક્તાઃ ।
કિમુપેક્ષસે પ્રસીદ ક્ષિતિધરકન્યેઽદ્ય કાન્તિમત્યમ્બ ॥ ૩૫॥

મન્માનસામ્રશાખી પલ્લવિતઃ પુષ્પિતોઽનુરાગેણ ।
હર્ષેણ ચ પ્રસાદાલ્લઘુ તવ ફલિનોઽસ્તુ કાન્તિમત્યમ્બ ॥ ૩૬॥

ધ્યાનામ્બરવસતેર્મમ માનસમેઘસ્ય દૈન્યવર્ષસ્ય ।
પદયુગલી તવ શમ્પા લક્ષ્મીં વિદધાતુ કાન્તિમત્યમ્બ ॥ ૩૭॥

કલિતપનભાનુતપ્તં ચિત્તચકોરં મમાતિશીતાભિઃ ।
જીવય કટાક્ષદમ્ભજ્યોત્સ્નાભિર્દેવિ કાન્તિમત્યમ્બ ॥ ૩૮॥

જ્યોત્સ્નાસધ્રીચીભિર્દુગ્ધશ્રીભિઃ કટાક્ષવીચીભિઃ ।
શીતલયાનીચીભિઃ કૃપયા માં દેવિ કાન્તિમત્યમ્બ ॥ ૩૯॥

રુષ્ટા ત્વમાગસા યદિ તર્જય દૃષ્ટ્યાપિ નેક્ષસે યદિ મામ્ ।
બાલ ઇવ લોલચક્ષુઃ કં શરણં યામિ કાન્તિમત્યમ્બ ॥ ૪૦॥

વિભવઃ કે કિં કર્તું પ્રભવઃ કરુણા ન ચેત્તવાન્તેऽપિ ।
નોચ્છ્વસિતું કૃતમેભિસ્ત્વામીશ્વરિ નૌમિ કાન્તિમત્યમ્વ ॥ ૪૧॥

જિત્વા મદમુખરિપુગણમિત્વા ત્વદ્ભક્તભાવસામ્રાજ્યમ્ ।
ગત્વા સુખં જનોऽયં વર્તેત કદા નુ કાન્તિમત્યમ્બ ॥ ૪૨॥

અખિલદિવિષદાલમ્બે પદયુગ્મં દેવિ તે સદાऽऽલમ્બે ।
જગતાં ગોમત્યમ્બ ક્ષિતિધરકન્યેऽથ કાન્તિમત્યમ્બ ॥ ૪૩॥

અત્રૈવ કલ્પવલ્લીચિન્તામણિરસ્તિ કામધેનુરપિ ।
વેદ્મિ ન કિં યદિ બુધતા પુંસા લભ્યેત કાન્તિમત્યમ્બ ॥ ૪૪॥

નાહં ભજામિ દૈવં મનસાપ્યન્યત્ત્વમેવ દૈવં મે ।
ન મૃષા ભણામિ શોધય માનસમાવિશ્ય કાન્તિમત્યમ્બ ॥ ૪૫॥

ખેદયસિ માં મૃગં કિં મૃગતૃષ્ણેવ પ્રસીદ નૌમિ શિવે ।
મોદય કૃપયા નો ચેત્ક્વ નુ યાયાં દેવિ કાન્તિમત્યમ્બ ॥ ૪૬॥

કાર્યં સ્વેન સ્વહિતં કો નામ વદેદયં જનો વેત્તિ ।
ત્વં વા વદસિ કિમસ્માદ્ગતિસ્ત્વમેવાસ્ય કાન્તિમત્યમ્બ ॥ ૪૭॥

ધન્યોऽસ્તિ કો મદન્યો દિવિ વા ભુવિ વા કરોષિ ચેત્કરુણામ્ ।
ઇદમપિ વિશ્વં વિશ્વં મમ હસ્તે કિં ચ કાન્તિમત્યમ્બ ॥ ૪૮॥

તરુણેન્દુચૂડજાયે ત્વાં મનુજા યે ભજન્તિ તેષાં તે ।
ભૂતિઃ પદાબ્જધૂલિર્ધૂલિર્ભૂતિસ્તુ કાન્તિમત્યમ્બ ॥ ૪૯॥

ત્વામત્ર સેવતે યસ્ત્વત્સારૂપ્યં સમેત્ય સોऽમુત્ર ।
હરકેલ્યાં ત્વદસૂયાપાત્રતિ ચિત્રાઙ્ગિ કાન્તિમત્યમ્બ ॥ ૫૦॥

ચિત્રીયતે મનસ્ત્વાં દૃષ્ટ્વા ભાગ્યાવતારમૂર્તિં મે ।
કિઞ્ચ સુધાબ્ધેર્લહરીવિહારિતામેતિ કાન્તિમત્યમ્બ ॥ ૫૧॥

કિરતુ ભવતી કટાક્ષાઞ્જલજસદૃક્ષાન્ રસેન તાદૃક્ષાન્ ।
કૃતસુરરક્ષાન્મોહનદક્ષાન્ભીમસ્ય કાન્તિમત્યમ્બ ॥ ૫૨॥

માનસવાર્ધિનિલીનૌ રાગદ્વેષૌ પ્રવોધવેદમુષૌ ।
મધુકૈટભૌ તવેક્ષણમીનો મે હરતુ કાન્તિમત્યમ્બ ॥ ૫૩॥

મઞ્જુલભાષિણિ વઞ્જુલકુડ્મલલલિતાલકે લસત્તિલકે ।
પાલય કુવલયનયને બાલં માં દેવિ કાન્તિમત્યમ્વ ॥ ૫૪॥

પુરમથનવિલોલાભિઃ પટુલીલાભિઃ કટાક્ષમાલાભિઃ ।
શુભશીલાભિઃ કુવલયનીલાભિઃ પશ્ય કાન્તિમત્યમ્બ ॥ ૫૫॥

કરુણારસાર્દ્રનયને શરણાગતપાલનૈકકૃતદીક્ષે ।
પ્રગુણાભરણે પાલય દીનં માં દેવિ કાન્તિમત્યમ્બ ॥ ૫૬॥

નરજન્મૈવ વરં ત્વદ્ભજનં યેન ક્રિયેત ચેદસ્માત્ ।
કિમવરમેવં નો ચેદતસ્તદેવાસ્તુ કાન્તિમત્યમ્બ ॥ ૫૭॥

યદ્દુર્લભં સુરૈરપિ તન્નરજન્માદિશો નમામ્યેતત્ ।
સાર્થય દાનાદ્ભક્તેર્વ્યર્થય માન્યેન કાન્તિમત્યમ્બ ॥ ૫૮॥

જીવતિ પઞ્ચભિરેભિર્ન વિનાઽસ્ત્યેભિર્જનસ્તનું ભજતે ।
તદપિ તદાસીનાં ત્વાં દરમપિ નો વેત્તિ કાન્તિમત્યમ્બ ॥ ૫૯॥

યત્પ્રેમદ્વિપવદને ષડ્વદને વા કુરુષ્વ તન્મયિ તે ।
જાત્વપિ મા ભૂદ્ભેદઃ સ્તોકેષ્વસ્માસુ કાન્તિમત્યમ્બ ॥ ૬૦॥

શમ્બરરુહરુચિવદને શમ્બરરિપુજીવિકે હિમાદ્રિસુતે ।
અમ્બરમધ્યે બમ્બરડમ્બરચિકુરેઽવ કાન્તિમત્યમ્બ ॥ ૬૧॥

મન્માનસપાઠીનં કલિપુલિને ક્રોધભાનુસન્તપ્તે ।
સિઞ્ચ પરિતો ભ્રમન્તં કૃપોર્મિભિર્દેવિ કાન્તિમત્યમ્બ ॥ ૬૨॥

યમિનઃ ક્વ વેદ મુકુટાન્યપિ ભવતીં ભાવયન્તિ વા નો વા ।
યદ્યેવં મમ હૃદયં વેત્તુ કથં બ્રૂહિ કાન્તિમત્યમ્બ ॥ ૬૩॥

ક્લિશ્યત્યયં જનો બત જનનાથૈરિત્યહં શ્રિતો ભવતીમ્ ।
તત્રાપ્યેવં યદિ વદ તવ કિં મહિમાઽત્ર કાન્તિમત્યમ્બ ॥ ૬૪॥

વૃજિનાનિ સન્તુ કિમતસ્તેષાં ધૂત્યૈ ન કિં ભવેદ્વદ તે ।
સ્મરણં દૃષદુત્ક્ષેપણમિવ કાકગણસ્ય કાન્તિમત્યમ્બ ॥ ૬૫॥

પ્રસરતિ તવ પ્રસાદે કિમલભ્યં વ્યત્યયે તુ કિં લભ્યમ્ ।

લભ્યમલભ્યં કિં નસ્તેન વિના દેવિ કાન્તિમત્યમ્બ ॥ ૬૬॥

કિં ચિન્તયામિ સંવિચ્છરદુદયં ત્વત્પદચ્છલં કતકમ્ ।
ધૃષ્ટં યદિ પ્રસીદેદ્ધૃદયજલં મેઽદ્ય કાન્તિમત્યમ્બ ॥ ૬૭॥

વિભજતુ તવ પદયુગલી હંસીયોગીન્દ્રમાનસૈકચરી ।
સંવિદસંવિત્પયસી મિલિતે હૃદિ મેઽદ્ય કાન્તિમત્યમ્બ ॥ ૬૮॥

કિયદાયુસ્તત્રાર્ધં સ્વપ્ને ન હૃતં કિયચ્ચ બાલ્યાદ્યૈઃ ।
કિયદસ્તિ કેન ભજનં તૃપ્તિસ્તવ કેન કાન્તિમત્યમ્બ ॥ ૬૯॥

વેદ્મિ ન ધર્મમધર્મં કાયક્લેશોઽસ્ત્યદો વિચારફલમ્ ।
જાનામ્યેકં ભજનં તવ શુભદં હીતિ કાન્તિમત્યમ્બ ॥ ૭૦॥

સ્નિહ્યતિ ભોગે દ્રુહ્યતિ યોગાયેદં વૃથાઽદ્ય મુહ્યતિ મે ।
હૃદયં કિમુ સ્વતો વા પરતો વા વેત્તિ કાન્તિમત્યમ્બ ॥ ૭૧॥

ન બિભીમો ભવજલધેર્દરમપિ દનુજારિસોદરિ શિવે તે ।
આસ્તે કટાક્ષવીક્ષાતરણિર્નનુ દેવિ કાન્તિમત્યમ્બ ॥ ૭૨॥

ચિન્તામણૌ કરસ્થેઽપ્યટનં વીથીષુ કિં બ્રુવે માતઃ ।
વદ કિં મે ત્વયિ સત્યામન્યાશ્રયણે ન કાન્તિમત્યમ્બ ॥ ૭૩॥

નરવર્ણનેન રસના પરવનિતાવીક્ષણેન નેત્રમપિ ।
ક્રૌર્યેણ મનોઽપિ હતં ભાવ્યં તુ ન વેદ્મિ કાન્તિમત્યમ્બ ॥ ૭૪॥

ત્રાસિતસુરપતિતમં તમં કિં ધર્મમેવ વા કૂમમ્ ।
કિમપિ ન સઞ્ચિતમમિતં વૃજિનમયે કિં તુ કાન્તિમત્યમ્બ ॥ ૭૫॥

પાપીત્યુપેક્ષસે ચેત્પાતું કાઽન્યા ભવેદ્વિના ભવતીમ્ ।
કિમિદં ન વેદ્મિ સોઽયં બકમન્ત્રઃ કસ્ય કાન્તિમત્યમ્બ ॥ ૭૬॥

વઞ્ચયિતું વૃજિનાદ્યૈર્મુગ્ધાન્ભવતીં વિનેતરાન્નેક્ષે ।
કિમતઃ પરં કરિષ્યસિ વિદિતમિદં મેઽદ્ય કાન્તિમત્યમ્બ ॥ ૭૭॥

વઞ્ચયસિ માં રુદન્તં બાલમિવ ફલેન માં ધનાઢ્યેન ।
માસ્તુ કદાપિ મમેદં કૈવલ્યં દેહિ કાન્તિમત્યમ્બ ॥ ૭૮॥

ત્રય્યા કિં મેઽદ્ય ગુણે તવ વિદિતે યો યતસ્તુ સમ્ભવતિ ।
આસ્તાં મૌક્તિકલાભે સતિ શુક્ત્યા કિં નુ કાન્તિમત્યમ્બ ॥ ૭૯॥

અદ્ભુતમિદં સકૃદ્યેન જ્ઞાતા વા શ્રિયો દિશસ્યેભ્યઃ ।
યે ખલુ ભક્તાસ્તેભ્યઃ કૈવલ્યં દિશસિ કાન્તિમત્યમ્બ ॥ ૮૦॥

સુરનૈચિકીવ વિબુધાન્કાદમ્બિનિકેવ નીલકણ્ઠમપિ ।
પ્રીણયસિ માનસં મે શોભય હંસીવ કાન્તિમત્યમ્બ ॥ ૮૧॥

કર્તું મનઃપ્રસાદં તવ મયિ ચેત્કિં કરિષ્યતિ વૃજિનમ્ ।
જલજવિકાસે ભાનોઃ પરિપન્થિતમો નુ કાન્તિમત્યમ્બ ॥ ૮૨॥

તવ તુ કરુણા સ્રવન્ત્યાં પ્રવહન્ત્યાં સ્તોકતા ગતેતિ મયા ।
લુઠતિ સ્ફુટતિ મનો મે નેદં જાનાસિ કાન્તિમત્યમ્બ ॥ ૮૩॥

શોધયિતુમુદાસીના યદિ માં પાત્રં કિમસ્ય પશ્યાહમ્ ।
માદૃશિ કા વા વાર્તા દાસજને કાન્તિમત્યમ્બ ॥ ૮૪॥

અભજમનન્યગતિસ્ત્વાં કિં કુર્યાસ્ત્વં ન વેદ્મ્યતઃપ્રભૃતિ ।
અવને વાઽનવને વા ન વિચારો મેઽસ્તિ કાન્તિમત્યમ્બ ॥ ૮૫॥

કિં વર્તતે મમાસ્માન્નિખિલજગન્મસ્તલાલિતં ભાગ્યમ્ ।
યમિહૃદયપદ્મહંસીં યત્ત્વાં સેવેઽદ્ય કાન્તિમત્યમ્બ ॥ ૮૬॥

કર્તું જગન્તિ વિધિવદ્ભર્તું હરિવદ્ગિરીશવદ્ધર્તુમ્ ।
લીલાવતી ત્વમેવ પ્રતીયસે દેવિ કાન્તિમત્યમ્બ ॥ ૮૭॥

કેચિદ્વિદન્તિ ભવતીં કેચિન્ન વિદન્તિ દેવિ સર્વમિદમ્ ।
ત્વત્કૃત્યં વદ સત્યં કિં લબ્ધં તેન કાન્તિમત્યમ્બ ॥ ૮૮॥

શાસ્ત્રાણિ કુક્ષિપૂર્ત્યૈ સ્ફૂર્ત્યૈ નિગમાશ્ચ કર્મણા કિં તૈઃ ।
કિં તવ તત્ત્વં જ્ઞેયં યૈસ્ત્વત્કૃપયૈવ કાન્તિમત્યમ્બ ॥ ૮૯॥

કિં પ્રાર્થયે પુનઃ પુનરવને ભવતીં વિના વિચારઃ સ્યાત્ ।
કસ્યાઃ ક ઇતિ વિદન્નપિ દૂયે મોહેન કાન્તિમત્યમ્બ ॥ ૯૦॥

વિદુષસ્ત્વાં શરણં મે શાસ્ત્રશ્રમલેશવાર્તયાપિ કૃતમ્ ।
કરજુષિ નવનીતે કિં દુગ્ધવિચારેણ કાન્તિમત્યમ્બ ॥ ૯૧॥

પ્રણવોપનિષન્નિગમાગમયોગિમનઃસ્વિવાતિતુઙ્ગેષુ ।
ભાહિ પ્રભેવ તરણેર્મમ હૃદિ નિમ્નેઽપિ કાન્તિમત્યમ્બ ॥ ૯૨॥

સ્ફુટિતારુણમણિશોભં ત્રુટિતાભિનવપ્રવાલમૃદુલત્વમ્ ।
શ્રુતિશિખરશેખરં તે ચરણાબ્જં સ્તૌમિ કાન્તિમત્યમ્બ ॥ ૯૩॥

તવ ચરણામ્બુજભજનાદમૃતરસસ્યન્દિનઃ કદાપ્યન્યત્ ।
સ્વપ્નેऽપિ કિઞ્ચિદપિ મે મા સ્મ ભવેદ્દેવિ કાન્તિમત્યમ્બ ॥ ૯૪॥

વિસ્માપનં પુરારેરસ્માદૃગ્જીવિકાં પરાત્પરમમ્ ।
સુષમામયં સ્વરૂપં સદા નિષેવેય કાન્તિમત્યમ્બ ॥ ૯૫॥

મઙ્ગલમસ્ત્વિતિ પિષ્ટં પિનષ્ટિ ગીઃ સર્વમઙ્ગલાયાસ્તે ।
વશિતજયાયાશ્ચ તથા જયેતિ વાદોऽપિ કાન્તિમત્યમ્બ ॥ ૯૬॥

આશાસિતુર્વિભૂત્યૈ ભવતિ ભવત્યૈ હિ મઙ્ગલાશાસ્તિઃ ।
સ્વામિસમૃદ્ધ્યાશંસા ભૃત્યોન્નત્યૈ હિ કાન્તિમત્યમ્બ ॥ ૯૭॥

નિગમૈરપરિચ્છેદ્યં ક્વ વૈભવં તેऽલ્પધીઃ ક્વ ચાહમિતિ ।
તૂષ્ણીકં માં ભક્તિસ્તવ મુખરયતિ સ્મ કાન્તિમત્યમ્બ ॥ ૯૮॥

અનુકમ્પાપરવશિતં કમ્પાતટસીમ્નિ કલ્પિતાવસથમ્ ।
ઉપનિષદાં તાત્પર્યં તવ રૂપં સ્તૌમિ કાન્તિમત્યમ્બ ॥ ૯૯॥

જય ધરણીધરતનયે જય વેણુવનાધિરાટ્પ્રિયે દેવિ ।
જય જમ્ભભેદિવિનુતે જય જગતામમ્બ કન્તિમત્યમ્બ ॥ ૧૦૦॥

ગુણમઞ્જરિપિઞ્જરિતં સુન્દરરચિતં વિભૂષણં સુદૃશામ્ ।
ગીતિશતકં ભવત્યાઃ ક્ષયતુ કટાક્ષેણ કાન્તિમત્યમ્બ ॥ ૧૦૧॥

વપ્તા યસ્ય મનીષિહારતરલઃ શ્રીવેઙ્કટેશો મહાન્-
    માતા યસ્ય પુનઃ સરોજનિલયા સાધ્વીશિરોભૂષણમ્ ।
શ્રીવત્સાભિજનામૃતામ્બુધિવિધુઃ સોऽયં કવિઃ સુન્દરો
    દેવ્યા ગીતિશતં વ્યધત્ત મહિતં શ્રીકાન્તિમત્યા મુદે ॥ ૧૦૨॥

ઇતિ શ્રીસુન્દરાચાર્યપ્રણીતં દેવીગીતિશતકં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran

*devIgItishatakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*